No. ४६२९

Title दीपदानविधिः

Author ✗

Extent २ पत्रे Age सं. १८८१

Subject धर्मशास्त्रम्

दीपदानविधिः दीपदानकारिका वा

षद्दर५

॥श्रीगणेशाय नमः॥ दीपदानविधिः॥ आश्विने कार्त्तिके मासि माघे मासि मन्ताश्च
ये॥ कृष्णचतुर्दश्यां दीये तद्दीपदानविधानतः॥ शान्य ग नह वद्वत्॥ तमुद्दिश्य
दद्यात्त्रतेन आप्यायतो व्रजेत्॥ अंधकारे पथे घोरे प्रमूर्त्ति लक्षवर्जिते॥२॥
उद्योतनैव वर्तेयाति दीपदानेन मानवः॥ आश्विने कार्त्तिके मासि माघमासि म
तांतिथ्यावपि॥ चतुर्दश्यां च दीये तद्दीपदानं सुखावहं॥ अथ दीपदानप्रयो
गः॥ तीर्थे गत्वा संध्यादिकं विधायादेशकालौ स्मृत्वा पसव्यं गोत्रस्य अमुकशर्म
णः परलोके अंधकारे शान्तिरस्त्वर्थं सद्गति अक्षय्यविष्णुलोकप्राप्त्यर्थं दीपदान
महंकरिष्ये॥ सव्यं॥ तत्रापंचोपचारैः विष्णुपूजनमहं करिष्ये॥ वैष्णवश्राद्धं॥ पश्चा
द्दीपत्रयं कुर्यात्॥ ततः कलशत्रयस्थापनं कलशोपरि पक्वान्नस्थापनं॥ अपक्वा॥क

दो

दी.प.

लशोपरि ध्वजाकरणं॥ तत्र पूजा॥ कलशोपरि देवतात्रय सूर्य धर्मराज चित्र
गुप्तं च॥ सूर्यादित्रयदेवतानां आवाहनादि पूजा॥ ततः दक्षिणाभिमुखो
३ पविश्य देशकालौ स्मृत्वा पसव्यं गोत्राय अमुक शर्मणे परलोके अक्षल
निवर्त्यर्थं दीपत्रयं अक्षय्यमस्तु स्वधा॥ सव्यं॥ करसंपूटं कृत्वा मन्त्रान्प
ठेत्॥ इमं मे दीपकं विष्णो स्वर्गमृत्यु प्रदीयतां॥ पितॄणां नरकस्थानात्ता
भिस्त्र हरतामसौ॥१॥ एष दीपो मया दत्तो तमो दोषाव शांतये॥ एतद्दीप
प्रदानेन पापं यांति सहस्रधा॥२॥ दीपपालकहंताचु दीपो यं कुलदीपकः॥
तस्माद्दीपप्रदानेन ज्योतिरं तिप्रयच्छ मे॥३॥ अपसव्यं॥ दीपदानप्रति
ष्ठासिध्यर्थं ब्राह्मणत्रयं एकं वा अहं भोजयिष्ये अक्षय्यमस्तु स्वधा॥ प ४

याप्रांक्ति रुद्रेण मुखवासं च अस्य मस्तकः॥ सर्व्वं॥ अपूर्वं चरितं भवतां ब्राह्मण
वचनात् श्रीविष्णोः प्रसादात् दीपदानकृतस्य सर्व्वं परिपूर्णं मस्तकं॥ इति दीपदान
विधिः॥ पुराणान्तरे॥ येन केनैव प्रकारेण गोविंद तमो देवो विनश्यति॥ केन केन
च मंत्रेण कथयस्य जगत्पते॥ श्रीकृष्णोवाच॥ शृणु नारद प्रवक्ष्यामि दीपदानवि
धिं ततः॥ अरुणोदयवेलायां दीपदानं करोति यः॥ २॥ तेन दीपप्रदानेन तमोहे
बो विनश्यति॥ तत्सर्वं कथयिष्यामि दीपदानविधिं शृणु॥ ३॥ शुभे तीर्थे पुण्यज
ले कृत्वा स्नानविधानतः॥ प्राणायामत्रयं कृत्वा कालज्ञानं ततः परं॥ ४॥ कृत्वा तु वैस
वश्राद्धं विष्णुपूजनपूर्वकं॥ तत्र दीपत्रयं कुर्यात् स्थापयेत् कलशत्रयं॥ ५॥ स्नेहान्ने
न च संयुक्ते पत्रकात्रयसंयुतान्॥ प्रतिष्ठां कारयेत्तत्र गंधपुष्पैः प्रपूजयेत्॥ ६॥ नैवेधं
च ततो दद्यात् फलैरर्घं प्रदापयेत्॥ रुद्रेण मिमुखो भूत्वा अपसव्यं करोत्यथ॥ ७॥ ना

मगोत्रसमुच्चार्यदीपंतस्यनिवेदयेत्॥तत्रमंत्रत्रयंवक्ष्येतच्छृणुभक्तखगेश्वर॥त॥क
॥२॥ रसंपुटंकृत्वाततोमंत्रान्समुच्चरेत्॥इमंमेदीपकंविद्धिमोक्षस्वर्गमत्युप्रदीयतां॥८॥पितृणां
नरकस्थानांतामिस्त्रहरस्तामसो॥एषदीपोमयादत्तोतमोदोषापशांतये॥९॥एतद्दीप
प्रदानेनपापंयांतिसहस्रधा॥दीपःपातकहंताचदीपोयंकुलदीपकः॥११॥तस्माद्दीपप्रदा
2 नेनज्योतिरंतिप्रयच्छमे॥भोजनंचततोदद्यात्दक्षिणाभिश्चतोषयेत्॥१२॥सुब्राह्मणा
दिकंकुर्यात्आशीर्वादस्ततःपठेत्॥अनेनैवविधानेनदीपदानंकरोतियः॥१३॥वि
मुक्ताःपितरस्तस्यसत्यंसत्यंवचोमम॥॥इतिदीपदानकारिका॥संवत्१८८१मीती.
पौषशुक्ल१सौम्यलिखितंउपाध्यायवेणीशंकरजेशंकरात्मजेनस्वार्थंपरोपकारार्थं
काशैलपुत्रीकिमुनेत्ररम्याम्मुकार्भकःकिंकुरुतेफलानि॥मोदस्यदातास्मरएषकोवागौरी ॥२॥